শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে সপ্তত্রিংশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে সপ্তত্রিংশং দশকম্ ॥

## অমৃতমথনে কূর্মাৱতারৱর্ণনম্

দুর্ৱাসাস্সুরৱনিতাপ্তদিৱ্যমাল্যং
    শক্রায স্ৱযমুপদায তত্র ভূযঃ।
নাগেন্দ্রপ্রতিমৃদিতে শশাপ শক্রং
    কা ক্ষান্তিস্ত্ৱদিতরদেৱতাংশজানাম্॥ **27.1** ॥

শাপেন প্রথিতজরেঽথ নির্জরেন্দ্রে
    দেৱেষ্ৱপ্যসুরজিতেষু নিষ্প্রভেষু।
শর্ৱাদ্যাঃ কমলজমেত্য সর্ৱদেৱা
    নির্ৱাণপ্রভৱ সমং ভৱন্তমাপুঃ॥ **27.2** ॥

ব্রহ্মাদ্যৈঃ স্তুতমহিমা চিরং তদানীং
    প্রাদুষ্ষন্ ৱরদ পুরঃ পরেণ ধাম্না।
হে দেৱা দিতিজকুলৈর্ৱিধায সন্ধিং
    পীযূষং পরিমথতেতি পর্যশাস্ত্ৱম্॥ **27.3** ॥

সন্ধানং কৃতৱতি দানৱৈঃ সুরৌঘে
    মন্থানং নযতি মদেন মন্দরাদ্রিম্।
ভ্রষ্টেঽস্মিন্ বদরমিৱোদ্ৱহন্ খগেন্দ্রে
    সদ্যস্ত্ৱং ৱিনিহিতৱান্ পযঃপযোধৌ॥ **27.4** ॥

আধায দ্রুতমথ ৱাসুকিং ৱরত্রাং
    পাথোধৌ ৱিনিহিতসর্ৱবীজজালে।

প্রারব্ধে মথনৱিধৌ সুরাসুরৈস্তৈ -
    র্ব্যাজাত্ত্বং ভুজগমুখেঽকরোস্সুরারীন্ ॥ **27.5** ॥

ক্ষুব্ধাদ্রৌ ক্ষুভিতজলোদরে তদানীং
    দুগ্ধাব্ধৌ গুরুতরভারতো নিমগ্নে।
দেৱেষু ৱ্যথিততমেষু তৎপ্রিযৈষী
    প্রাণৈষীঃ কমঠতনুং কঠোরপৃষ্ঠাম্ ॥ **27.6** ॥

ৱজ্রাতিস্থিরতরকর্পরেণ ৱিষ্ণো
    ৱিস্তারাৎপরিগতলক্ষযোজনেন।
অম্ভোধেঃ কুহরগতেন ৱর্ষ্মণা ৎৱং
    নির্মগ্নং ক্ষিতিধরনাথমুন্নিনেথ ॥ **27.7** ॥

উন্মগ্নে ঝটিতি তদা ধরাধরেন্দ্রে
    নির্মেথুর্দৃঢমিহ সম্মদেন সর্ৱে।
আৱিশ্য দ্বিতযগণেঽপি সর্পরাজে
    ৱৈৱশ্যং পরিশমযন্নৱীৱৃধস্তান্ ॥ **27.8** ॥

উদ্দামভ্রমণজৱোন্নমদ্গিরীন্দ্র -
    ন্যস্তৈকস্থিরতরহস্তপঙ্কজং ৎৱাম্।
অভ্রান্তে ৱিধিগিরিশাদযঃ প্রমোদা -
    দুদ্ভ্রান্তা নুনুৱুরুপাত্তপুষ্পৱর্ষাঃ ॥ **27.9** ॥

দৈত্যৌঘে ভুজগমুখানিলেন তপ্তে
    তেনৈৱ ত্রিদশকুলেঽপি কিঞ্চিদার্তে।
কারুণ্যাত্তৱ কিল দেৱ ৱারিৱাহাঃ
    প্রাৱর্ষন্নমরগণান্ন দৈত্যসঙ্ঘান্ ॥ **27.10** ॥

উদ্ভ্রাম্যদ্বহুতিমিনক্রচক্রৱালে
    তত্রাব্ধৌ চিরমথিতেঽপি নির্ৱিকারে।

একস্ত্বং করযুগকৃষ্টসর্পরাজঃ
সংরাজন্ পৱনপুরেশ পাহি রোগাৎ॥ **27.11** ॥

॥ ইতি শ্রীমন্নারাযণীযে সপ্তৱিংশং দশকং সমাপ্তম্॥